# श्रीसुरसरस्वतीसभा, श्रृङ्गेरी

## तृतीयपरीक्षा - प्रथमपत्रिका

दिनाङ्कः - २८.०१.२०१८ | अपराह्णः १०.००तः १.००पर्यन्तम्

समयः - होरात्रयम् | अङ्काः -१००

1. **पञ्चानां संस्कृते एकवाक्येन उत्तरं लिखत ।** 5

१. एकलव्यः कः ?

२. मल्लस्य नाम किम् ?

३. शङ्कराचार्यः कदा अवातरत् ?

४. किं न साधवो विस्मरन्ति ?

५. विद्यार्थी चेत् किं त्यजेत् ?

६. भुजङ्गमः रोषात् किमकरोत् ?

७. तारकेण विप्रकृताः देवाः कुत्र ययुः ?

८. सीता कुत्र कथमवर्तत ?

2. **षण्णां द्वित्रैः वाक्यैः उत्तरं लिखत ।** 12

१. नव गोप्यानि कानि ? लिखत।

२. विष्णोः आकारः कीदृशः ? सः कैः ध्यानगम्यः ?

३. हनुमान् समुद्रस्योपरि किं किं चकार ?

४. मल्लस्य सामर्थ्यं विशदयत।

५. चित्रग्रीवः कः ? सः स्वाश्रितान् कथं ररक्ष ?

६. पितामहः आत्मानं कथं दर्शितवान् ?

७. गृहिणी द्विजं किमवदत् ?

८. शङ्कराचार्यस्य शिष्याः के ?

3. **त्रयाणां पञ्चषैः वाक्यैः संस्कृतेन उत्तरं लिखत ।** 9

१. कुष्टव्याधिपरिपीडितः विप्रः राजानं विक्रममुपसृत्य किमवदत् ?

२. के के त्याज्याः ?

३. षड्दोषाः के ?

४. शङ्कराचार्यैः कुत्र कुत्र मठाः स्थापिताः ? कुतः ?

4. **चतुर्णां मातृभाषया दशभिः वाक्यैः उत्तरं लिखत ।** 12

१. भोजराजेन दत्ता समस्या का ? सा केन कथं पूरिता ?

२. " ब्राह्मणः सर्पः च" अस्याः कथायाः सारांशं लिखत।

३. " आहारशुद्धौ सत्त्वशुद्धिः" पाठं विशदयत।

४. " विकत्थनस्य मल्लस्य कथा " सङ्गृह्य लिखत।

५. कीदृशी वाग्देवता कथं वदने निवसतु ?

5. **चतुर्णां ससन्दर्भं मातृभाषया विवृणुत ।** 12

१. " न हि किञ्चित् गुरवे अदेयम् "

२. " केवलं जगति तेऽपि राक्षसाः "

३. " देवि, मा विषादं कृथाः "

४. " तौ भूतानां प्रलयोदयौ "

५. " तदनन्तरं यद्भावि तद्भवतु "

६. " भोः द्विजोत्तम ! मनुष्याणां क्रोधः शरीरस्थो रिपुः "

6. **द्वयोः अन्वयानुसारम् अर्थं मातृभाषया लिखत ।** 4

१. ततः शक्रजिता युद्धे बद्धः पवननन्दनः।
प्रतापं रघुनाथस्य रावणं तं न्यवेदयत्॥

२. द्रवः सङ्घातकठिनः स्थूलः सूक्ष्मो लघुर्गुरुः।
व्यक्तो व्यक्तेतरश्चासि प्राकाम्यं ते विभूतिषु॥

३. यथा कन्दुकपातेनोत्पतत्यार्यः पतन्नपि।
तथा त्वनार्यः पतति मृत्पिण्डपतनं यथा॥

7. श्लोकद्वयं पूरयत । 4

१. वागीशाद्या: ------------- गजाननम् । ३. राजा घृणी ---------- कृतं न वेत्ति।

२. पौलस्त्य: ------------ मति: क्षीयते।

8. गद्यस्य अस्य अनुवादं कुरुत । 4

पार्वत्या: शङ्करसेवासमये तारकासुरपरिभवम् असहमाना: इन्द्रादयो देवा: तन्निवेदनाय ब्रह्मण: सद्म प्रपेदिरे। तत्र ते सर्वे देवा: चतुर्मुखं ब्रह्माणं प्रणम्य "त्वमेव सर्वस्य कारणम्" इति यथार्थभूताभि: वाग्भि: स्तोतुं समुपचक्रिरे।

9. रिक्तस्थानानि पूरयत । 4

१. राजा बन्धु: ----------------- । ३. -------- वाग्डम्बरो न विश्वसनीय:।

२. यद्त्वा च --------------- भवेत्। ४. षोडशे कृतवान् ----------------।

10. त्रयाणां पर्यायपदानि लिखत । 3

१. झटिति २. अन्तिकम् ३. विचक्षण: ४. निर्वृति:

11. त्रयाणां विरुद्धपदानि लिखत । 3

१. सन्धि: २. रक्ष: ३. उपक्रम: ४. प्रचुरम्

12. वाक्यदोषं परिहरत । 3

१. तस्मिन् विशालं गृहे नार्य: वसन्ति। २. भवते अहं रोचते।

२. पक्षी वृक्षे अधिवसति।

13. त्रीणि पदानि संस्कृतवाक्येषु योजयत । 3

१. अकरवम् २. आदाय ३. सद्दशम्

14.एकस्य रूपाणि सर्वपुरुषवचनेषु लिखत । 3

१. इण् (एति) लट्  २. लभ् (लभते) विधि  ३. अस् (अस्ति) लङ्

15. सन्धिं विभज्य सन्धिनाम लिखत । 3

१. पश्यन्नपि  २. दूराद्धूते  ३. तल्लयः

16. लोकोक्तिं पूरयित्वा मातृभाषया विवृणुत (द्वे एव)। 4

१. याञ्चा मोघा ------ लब्धकामा।  ३. चक्रार ------------ भाग्यपङ्क्ति।

२. यादृशं --------------- तादृशी।

17. संयोज्य लिखत । 4

| अ | आ |
|---|---|
| १. शक्यते | ल्यबन्ताव्ययम् |
| २. बभूव | अव्ययम् |
| ३. आकर्ण्य | कर्मणि |
| ४. वस्तुतः | लिट्लकारः |

18. व्याकरणविशेषं लिखत। 2

१. मा शुचः  २. आस्ते स्म।

19. रेखाङ्कितपदमाधृत्य प्रश्नवाक्यं रचयत । 2

१. वाल्मीकिः <u>निषादम्</u> अशपत्।  २. साधुः <u>मन्दिरे</u> तिष्ठति ।

20. समूहेतरपदं पृथक् कृत्वा लिखत। 2

१. धेन्वा, चञ्चा, मत्वा, गवा  २. रमेशः, गणेशः, उमेशः, वागीशः

21. प्रयोगं परिवर्तयत। 2

१. सर्पेण युक्तमेव कृतम् ।  २. विष्णुशर्मणा पाठितास्ते राजपुत्राः।

----------------

## श्रीसुरसरस्वतीसभा, शृङ्गेरी

## तृतीयपरीक्षा - द्वितीयपत्रिका

दिनाङ्कः - २८.०१.२०१८ अपराह्णः १.३०तः ३.०० पर्यन्तम्

समयः - सार्धैकहोरा अङ्काः ५०

1. एकं विषयमधिकृत्य दशभिः वाक्यैः संस्कृतभाषायां प्रबन्धमेकं लिखत। 5

१. पुस्तकालयः २. परिसरमालिन्यम् ३. पुण्यक्षेत्रम्

2. एकं विषयमधिकृत्य संस्कृतभाषायां पत्रमेकं लिखत। 5

१. उद्योगार्थम् अभ्यर्थनापत्रम्।

२. धनप्रेषणार्थं पितरं प्रति पत्रम्।

3. द्वयोः लक्षणं सोदाहरणं मातृभाषया लिखत। 6

१. अव्ययम् २. क्त-क्तवतु प्रत्ययौ ३. शतृ - शानच् प्रत्ययौ

4. वाक्यदोषान् समीकुरुत। 4

१. महाराजा रथे गच्छति। ३. गुरुः शिष्यं कुप्यति।

२. पिता मन्दिरस्य निकषा तिष्ठति। ४. लतया पुष्पाणि पतन्ति ।

5. द्वयोः रूपाणि सर्वपुरुषवचनेषु लिखत। 6

१. मोदताम् २. कुर्यात् ३. अब्रवीत्

6. संस्कृतवाक्ये योजयत। 4

१. बहिः २. ऋते ३. साकम् ४. वामतः

7. सर्वविभक्तिवचनेषु लिखत। (एकमेव) 4

१. मनस् २. भिषज् ३. तपस्विन्

8. वाक्यमेकं विवृणुत। 2

१. निः स्पृहस्य तृणं जगत्।

२. यतो धर्मस्ततो जयः।

9. स्त्रीलिङ्गरूपं लिखत 2

१. सेवमानः २. ददत् ३. दायकः

10. एकस्य व्याकरणविशेषं लिखत। 2

१. प्रजाभ्यः स्वस्ति २. अक्ष्णा काणः

11. मातृभाषया अनुवदत 5

१. अलसः बालकः कालं यापयन् नाभिवर्धते।

२. घटस्य रन्ध्रात् क्षीरं स्रुतवत्।

३. सुलभां सुरसां च संस्कृतभाषां शिक्षध्वम्।

४. सीतायाः पतिः सेतोः बन्धनाय अयतत।

५. अलं विषादेन, गुरोराशिषा विपन्नश्यति।

12. संस्कृतभाषायाम् अनुवदत 5

1) Why do you not understand what is stated?

2) I was afraid while seeing the lion moving in the forest.

3) The teacher sat on the chair.

4) My sister desired to see me.

5) Let the traitors to the nation perish.

---------------